Roll No.

Total No. of Questions : 19

Total No. of Printed Pages : 8

# TT-106

## कक्षा 9वीं, स्थानीय मुख्य परीक्षा–2017 (पुनरीक्षित)

## संस्कृत (सामान्य)

## SANSKRIT (General)

Time : 3 Hours ] [ Maximum Marks : 100

निर्देश : – (i) सर्वे प्रश्नाः करणीयाः ।

(ii) प्रश्नानां सम्मुखे अङ्काः दत्ताः ।

1. उचितविकल्पं चित्वा लिखत – 5

(i) "शिवालयः" इत्यस्मिन् पदे सन्धिः अस्ति –

(अ) गुण सन्धिः (ब) दीर्घ सन्धिः

(स) अयादि सन्धिः (द) वृद्धि सन्धिः

(ii) 'विसर्ग सन्धेः' उदाहरणम् अस्ति –

(अ) महेशः (ब) मनोहरः

(स) वागीशः (द) उज्जवलः

(iii) 'दिक्' + गजः = .......... भवति –

(अ) दिग्गजः (ब) दिगजः

(स) दिग्गजः (द) दिकृजः

(iv) 'सोऽपि' एतस्य पदस्य सन्धि–विच्छेदः भवति –

(अ) सो + अपि (ब) सः + अपि

(स) स + अपि (द) सो + ऽपि

(v) अधोलिखितेषु अव्ययं नास्ति –

(अ) खलु (ब) यथा

(स) अस्तु (द) तत्र



2. उचितविकल्पं चित्वा लिखत – 5

(i) "तत्पुरुषसमासस्य" उदाहरणम् अस्ति –

(अ) प्रतिदिनम् (ब) दीनदानम्

(स) त्रिभुवनम् (द) नीलोत्पलम्

(ii) "रामलक्ष्मणौ" इत्यस्मिन् पदस्य समासविग्रहः भवति –

(अ) रामः लक्ष्मणः (ब) रामः च लक्ष्मणः च

(स) रामः लक्ष्मणः च (द) रामः च लक्ष्मणः

(iii) "यथाशक्तिः" इत्यस्मिन् पदे समासः अस्ति –

(अ) द्वन्द्व समासः (ब) कर्मधारय समासः

(स) अव्ययीभाव समासः (द) बहुव्रीहि समासः

(iv) अधोलिखितेषु पदेषु उपसर्गयुक्तपदम् चित्वा लिखत –

(अ) मम (ब) अवतारः

(स) गच्छामः (द) नृत्यति

(v) "निरुपायः" इत्यस्मिन् पदे उपसर्गः अस्ति –

(अ) निस् (ब) नि

(स) निर् (द) निध्

3. उचितविकल्पं चित्वा लिखत – 5

(i) "पठति" इत्यस्मिन् पदे वचनम् अस्ति –

(अ) एकवचनम् (ब) द्विवचनम्

(स) बहुवचनम्

(ii) "भविष्यामि" इत्यस्मिन् पदे पुरुषः अस्ति –

(अ) प्रथमपुरुषः (ब) मध्यमपुरुषः

(स) उत्तमपुरुषः

(iii) "नृत्यसि" इत्यस्मिन् पदे धातुः अस्ति –

(अ) नृत्य् (ब) नृत्

(स) ना (द) नृ

(iv) "अहसत्" इत्यस्मिन् पदे लकारः अस्ति –

(अ) लट् लकार (ब) लृट् लकार

(स) लङ् लकार (द) लोट् लकार

(v) "विद्याहीना न शोभन्ते" इत्यस्मिन् वाक्ये अव्ययं अस्ति –

(अ) विद्याहीना (ब) शोभन्ते

(स) न

4. उचितविकल्पं चित्वा लिखत – 5

(i) "हसितः" इत्यस्मिन् पदे प्रत्ययः अस्ति –

(अ) ल्यप् (ब) क्त

(स) तुमुन् (द) क्त्वा

(ii) पत् + तुमुन् = ......... भवति –

(अ) पततुम् (ब) पातुम्

(स) पतितुम् (द) पयतुम्

(iii) "क्तवतु" प्रत्ययस्य उदाहरणम् अस्ति –

(अ) खादितवान् (ब) श्रुत्वा

(स) गतः (द) सेवमान्

(iv) "अहं विद्यालयं गत्वा अध्यापनं करोमि" इत्यस्मिन् वाक्ये कृदन्तयुक्त पदम् अस्ति ।

(अ) अहं (ब) गत्वा

(स) अध्यापनं (द) करोमि

(v) सत्यश्रमाभ्याम् सकलार्थ ..........

(अ) सिद्धिः (ब) असिद्धिः



5. प्रदत्तशब्दैः रिक्तस्थानपूर्तिः करणीया – 5

(पुण्येन, जयसिंहेन, दुखितः, समुन्नतेः, पिप्पलः पितृभक्तः)

(i) राज्ञा ........... वेधशालानिर्माणं कारितम् ।

(ii) वरप्राप्त्या ........... अहङ्कारी जातः ।

(iii) सतां सद्भिः सङ्गः ........... भवति ।

(iv) हरिदत्तः कुपुत्रं दृष्टवा ........... सञ्जातः ।

(v) कर्त्तव्यपालनमेव आत्मनः देशस्य वा ........... मलमन्त्रः ।

6. निम्नलिखितेषु प्रश्नेषु त्रयाणां उत्तराणि संस्कृतभाषायाम् एकवाक्येन लिखत – 6

(i) कः महान् पितृभक्तः आसीत् ?

(ii) दशरथः किमर्थं वनं गतवान् ?

(iii) अष्टमूर्तिः इदानीं केन नाम्ना प्रख्याता ?

(iv) जरदगवनामा गृध्रः कुत्र वसति ?

(v) राज्ञा स्मृतिः कथम् उपलब्धा ?

7. अधोलिखितशब्दानाम् द्वयोः शब्दयोः रूपाणि निर्देशानुसारं त्रिषु वचनेषु लिखत – 2

(i) 'बालक' – चतुर्थीविभक्तिः

(ii) 'पितृ' – द्वितीयाविभक्तिः

(iii) 'फल' – षष्ठीविभक्तिः

(iv) 'भानु' – प्रथमाविभक्तिः

8. अधोलिखितशब्दानाम् द्वयोः शब्दयोः रूपाणि निर्देशानुसारं त्रिषु वचनेषु लिखत – 2

(i) "अस्मद्" – प्रथमाविभक्ति

(ii) "किम्" पुल्लिङ्ग – तृतीयाविभक्ति

(iii) "युष्मद्" – सप्तमीविभक्ति

(iv) "यत्" पुल्लिङ्ग – पंचमीविभक्ति

9 अधोलिखितेषु गद्यांशेषु गद्यांशद्वयस्य प्रश्नानाम् उत्तराणि संस्कृतभाषायां देयानि 16

(i) एकदा राजकुमारः चम्पा च नदीतटे क्रीडन्तौ आस्ताम् । तदैव राजकुमारः क्षुधापीडितः अभवत् । सः रोटिकां याचमानः रोदितवान् । सः न जानाति स्म यत् रोटिकायाः ग्रहणार्थं धनं नास्ति । चम्पा तं कथां श्रावयित्वा विनोदयामास । राजकुमारः बुभुक्षितः एव सुप्तवान् ।

(अ) एकदा राजकुमारः चम्पा च कुत्र क्रीडन्तौ आस्ताम् ?

(ब) कः क्षुधापीडितः अभवत् ?

(स) सः कां याचमानः रोदितवान् ?

(द) चम्पा तं कां श्रावयित्वा विनोदयामास ?

(इ) राजकुमारः कीदृशः सुप्तवान् ?

(ii) एकदा स तपस्वी नदीतीरे जपार्थमुपविष्टः । तस्मिन्काले कयाचित् बलाकया उड्डीयमानया तदङ्गोपरि पुरीषोत्सर्गः कृतः । स च तपस्वी क्रोधाकुलितनेत्रः यावदूर्ध्वं पश्यति तावत्क्रोधाग्निना भस्मीभूता बलाका भूमौ पतिता । दृष्ट्वा (बलाकां दग्ध्वा) नागरवणिग्गृहे भिक्षार्थं ययौ ।

(अ) तपस्वी जपार्थं कुत्र उपविष्टः ?

(ब) बलाकया मुनेः अङ्गोपरि किं कृतम् ?

(स) क्रोधाकुलितनेत्रः कः आसीत् ?

(द) बलाका कथं भस्मीभूता जाता ?

(इ) मुनिः भिक्षार्थं कुत्र ययौ ?

(iii) अस्ति ब्रह्मारण्ये कर्पूरतिलको नाम हस्ती । तमवलोक्य सर्वे शृगालाश्चिन्तयन्ति स्म – 'यद्ययं केनाप्युपायेन म्रियते तदा अस्माकम् एतद्देहेन मासचतुष्टयस्य भोजनं भविष्यति' । तत्रैकेन वृद्धशृगालेन प्रतिज्ञातम् – 'मया बुद्धिप्रभावादस्य मरणं साधयितव्यम् ।' अनन्तरं स वञ्चकः कर्पूरतिलकसमीपं गत्वा साष्टाङ्गपातं प्रणम्य उवाच – 'देव ! दृष्टिप्रसादं कुरु ।'

(अ) कर्पूरतिलको नाम हस्ती कुत्र आसीत् ?

(ब) तमवलोक्य के चिन्तयन्ति स्म ?

(स) वृद्धशृगालेन किं प्रतिज्ञातम् ?

(द) सः वञ्चकः कर्पूरतिलकसमीपं गत्वा कथं प्रणम्य उवाच ?

(इ) 'देव ! दृष्टिप्रसादं कुरु' इति कः उवाच ?



10 अधोलिखितेषु पद्यांशेषु पद्यांशद्वयस्य प्रश्नानां उत्तराणि संस्कृतभाषायां देयानि – 10

(i) शुकवद् भाषणं कुर्याद्, बकवद् ध्यानमाचरेत् ।
अजवच्चर्वणं कुर्याद्, गजवत्स्नानमाचरेत् ॥

(अ) भाषणं कथं कुर्यात् ?

(ब) ध्यानं कथं आचरेत् ?

(स) अजवत् किं कुर्यात् ?

(द) कीदृशः स्नानम् आचरेत् ?

(इ) कुर्यात् इत्यस्मिन् पदे लकारं पुरुषं च लिखत ।

(ii) अङ्गेन गात्रं नयनेन वक्त्रम्
न्यायेन राज्यं लवणेन भोज्यम् ।
धर्मेण हीनं खलु जीवितश्च
न राजते चन्द्रमसा विना निशा ॥

(अ) अङ्गेन विना किं न राजते ?

(ब) नयनेन किं राजते ?

(स) केन हीनं जीवितं न राजते ?

(द) चन्द्रमसा विना का न राजते ?

(इ) "न्यायेन" इत्यस्य पदस्य विभक्तिं वचनश्च लिखत ।

(iii) क्रोधाद्भवति संमोहः संमोहात्स्मृतिविभ्रमः ।
स्मृतिभ्रंशाद् बुद्धिनाशो बुद्धिनाशात्प्रणश्यति ॥

(अ) क्रोधात् किं भवति ?

(ब) कस्मात् स्मृतिविभ्रमः ?

(स) बुद्धिनाशः कस्मात् भवति ?

(द) बुद्धिनाशात् किं भवति ?

(इ) 'क्रोधात्' इत्यस्य पदस्य विभक्तिं वचनश्च लिखत ।

11 उचित युग्म-मेलनं कुरुत – (केचित् चत्वारः) 4

| | |
|---|---|
| (i) अतीवविषयासक्तः कुपुत्रः | (अ) मार्जारः |
| (ii) दीर्घकर्णनामा | (ब) पितृभक्तः |
| (iii) मित्राणि | (स) गृधः |
| (iv) श्रवणकुमारः | (द) दशरथः मरणम् |
| (v) पुत्रशोकेन | (इ) पितुः शिक्षां न श्रृणोति |
| | (फ) व्यवहारेण जायते |

12 शुद्धवाक्यानां समक्षम् ''आम्'' अशुद्धवाक्यानां समक्षं ''न'' इति लिखत – (केचित् चत्वारः) 4

(i) कलशः सक्तुभिः सम्पूरितः

(ii) राजा बालं न लालयति

(iii) दुर्जने विश्वासः करणीयः

(iv) स्वकर्त्तव्यपालनं न करणीयम्

(v) वाल्मीकिः आदिकविः अस्ति

13 निम्नलिखितेषु चतुर्णां प्रश्नानां उत्तराणि संस्कृतभाषायां एकपदेन लिखत – 4

(i) वेदोपनिषज्जनयित्री का ?

(ii) रक्षाकङ्कणं केन दत्तम् ?

(iii) उज्जयिनी कस्याः विद्यायाः प्रमुखं केन्द्रमस्ति ?

(iv) सत्सङ्गतिः पापं किं करोति ?

(v) पर्कटीवृक्षः कुत्र अस्ति ?

(vi) मदनविनोदेन स्वर्णपञ्जरस्थः शुकः कुत्र स्थापितः ?

14 प्रश्नपत्रे समागतान् श्लोकान् विहाय स्वपाठ्यपुस्तकात् कंठस्थीकृतं सुभाषितद्वयं लिखत । 4

15 स्वस्य प्राचार्यस्य कृते सप्तदिवसानां अवकाशार्थं प्रार्थनापत्रं संस्कृते लिखत । 4

अथवा

पुस्तकहेतोः प्रकाशकाय संस्कृते पत्रं लिखत ।

16 अधोलिखितेषु ''पञ्च'' अशुद्धकारकवाक्यानां शुद्धिः करणीया – 5

(i) मनोजः कन्दुकं क्रीडति ।

(ii) वृक्षेण पत्राणि पतन्ति ।

(iii) श्रीगणेशं नमः ।

(iv) बालकृष्णं नवनीतं रोचते ।

(v) सीता रामं सह वनं गता ।

(vi) शिक्षकः बालकं पुस्तकं ददाति ।



17 अधोलिखितेषु वाक्यानां क्रमसंयोजनं कुरुत – 5

(i) महर्षि वाल्मीकिः सप्तर्षीणां सत्सङ्गप्रभावात् महान तपस्वी जातः ।

(ii) सः ऋषिं दृष्ट्वा सीताराम–सीताराम इति उक्तवान् ।

(iii) सः शुकः ऋषिं दृष्ट्वा ''मारयतु कुट्टयतु'' इति वारं वारम् उच्चैः उक्तवान् ।

(iv) सज्जनानां सङ्गः करणीयः दुर्जनानां सङ्गः परिहर्तव्यश्च ।

(v) सः लोककल्याणार्थम् अहर्निशं भूतले भ्रमति स्म ।

18 अधोलिखितगद्यांशं सम्यक् पठित्वा संस्कृतभाषायां प्रश्नानां उत्तराणि लिखत – 5

संस्कृतं भारतस्य गौरवमयी भाषा अस्ति । एषा मानवमात्रस्य कल्याणं करोति, विश्वबन्धुत्वं च प्रसारयति । अस्याः साहित्यं विशालं वर्तते । संस्कृतं पठित्वा जनाः गौरवं अनुभवन्ति । संस्कृत–दिवसः रक्षाबन्धनदिवसे भवति ।

(i) अस्य गद्यांशस्य शीर्षकं लिखत ।

(ii) एषा भाषा किं प्रसारयति ?

(iii) संस्कृतसाहित्यं कथं वर्तते ?

(iv) संस्कृतं पठित्वा जनाः किम् अनुभवन्ति ?

(v) संस्कृतदिवसः कदा भवति ?

19 अधोलिखितेषु एकं विषयं स्वीकृत्य शतशब्देषु संस्कृते निबन्धं लिखत – 10

(i) शिक्षकः

(ii) मम पाठशाला

(iii) धेनुः

(iv) विद्या